# प्रथमोऽध्यायः

. . . . . . . . . . .

. . . . . . . . . . .

1. व्याकरणशास्त्रस्य परिचयः
2. ग्रन्थकर्तुर्नागेशभट्टस्य - परिचयः
3. भूति टीकाकर्तुस्तात्या - शास्त्रिणः परिचयः
4. विजया टीकाकर्तुर्जयदेव - मिश्रस्य परिचयः

व्याकरण शास्त्रस्य परिचय:

भाषाया: स्वरूपम्-

अस्मिन्नपि सभ्य समाजे सर्व व्यवहारस्याधारभूता – भाषा वर्तते । भाषामाश्रित्यैवसर्वे व्यवहारा: प्रचलन्ति । सा – द्विधोप युज्यते लेखन द्वारा वचसा च ।

स्वाभि व्यक्ति माध्यमेन भाषा आयाति, दृष्ट – पथे श्रुतिपथे च । जनै भाषा भाष्यते कथम् ? इति विषये उक्तम्- परान् बोधयितुं स्वाशयं प्रकटयितुं वा । अत: कथ्यते - भाष्यते – यया सा भाषा । भाषा दीपवद् विषयवस्तूनि प्रकाशयति । यथा – कथितं कवि वरेण दण्डिनाऽपि -

इदमन्धतम: कृत्स्नं जायते भुवनत्रयम् ।
यदि शब्दाह्वयं ज्योतिरा संसारं न दीप्यते ।। 1

व्याकरण स्वरूपम्- भाषाऽपि सुसंस्कृता भवेद् एतदर्थं शब्द साधुत्वमपेक्षते । शब्द-साधु विषयेयथोक्तं महामुनिना पतंजलिना- साधुशब्दानां ज्ञानं व्याकरणादेव भवति नात्र सन्देह: । व्याकरणं खलु साधुशब्दान् शास्ति । व्याक्रियन्ते व्युत्पाद्यन्ते साधु शब्दा अनेनेति व्युत्पत्त्या यथा प्रतिपादितम्-

"एक: शब्द: सम्यग् ज्ञात: शास्त्रान्वित: सुष्ठु प्रयुक्त: स्वर्गे लोके च कामधुग् भवति ।

---

1 – काव्यादर्शग्रन्थत:

'उत त्व: पश्यन्न ददर्श वाचं उतत्व: शृण्वन्न शृणोत्येनाम् ।
उत त्वसौ तन्वं विशस्रे जायेव पत्य उशती सुवासा:'।।[1]

अग्रे च -

'सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।
अत्रा सखाय: सख्यानि जानते भद्रैषां लक्ष्मी र्निहिताधिवाचि।।'[2]

व्याकरणस्य-महत्त्वं प्रतिपादयन् श्रीरामो हनुमद्विषये कथयति -

नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम् ।
बहु व्याहरतानेन न किंचिदपभाषितम् ।।[3]

अत: साधुशब्द ज्ञानमूलकं व्याकरणम् । व्याकरणज्ञो-नर: साधुशब्द-प्रयोगे कुशलो भवति । सर्वैरेव ज्ञायते यद् वेद: सर्वज्ञानमय:। यथोक्तम्-

सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक् ।
वेद शब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे ।।[4]

एतादृशं सर्व ज्ञानं वेदशब्देभ्य एव समायाति । यथा -

"शिक्षाकल्पनिरूक्तच्छन्दो-ज्यौतींषिषडङ्गो वेदोऽध्येयो ज्ञेयश्चेति"।

---

1- यास्ककृत निरूक्ते । 1/18 तथा ऋ0सं0 10/71/4

2- ऋ0सं0 10/71/2 तथा यास्ककृत निरूक्ते # 4/1।

3- वाल्मीकीय-रामायणे किष्किन्धाकाण्डे 3/30 पृ0 #04

4- मनुस्मृतौ अध्याय । श्लोक 2।

प्रधानंच षट्स्वङ्गेषु व्याकरणमेव भवति । छान्दोग्योपनिषदि - "वेदानां वेद" इत्युक्त्वा व्याकरणस्य मुख्यत्वं निर्णीतम् । व्याकरणस्य महत्त्वं प्रतिपादयता भर्तृहरिणा न्यगादीत्थम्-

"आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः ।

प्रथमं छन्दसामङ्गं प्राहुः व्याकरणं बुधाः ।।[1]

लक्ष्य-लक्षणाख्यं व्याकरणम्, लक्ष्यं प्रकृतिप्रत्ययात्मकं पदम्, लक्षणन्तु सूत्रम्। यथा - "पाकः" इति पदे पच् धातोः {प्रकृतेः} भावे इत्यर्थे घञ् प्रत्ययो वर्तते । उभयोर्योगे पाकः इति प्रयोगः सिद्ध्यति । अत्र लक्षणं "भावे" इति सूत्रं वरीवर्ति । अत एव लक्ष्यलक्षणयोर्यत्समुदितं व्याकरणं निगद्यते । यथाऽऽह पतंजलिः—

'लक्ष्य लक्षणे व्याकरणम्'[2] लक्ष्यंच लक्षणंचैतत् समुदितं व्याकरणं भवति । "शब्दकारणमर्थस्य" इति वचनेनार्थबोधाय शब्दानां प्रवृत्तिः । अर्थबोधस्य कारणं शब्द एव। भाष्यकारोऽपि निजगाद- अर्थनिमित्तक एव शब्दः । इत्थंच यथार्थविबोधस्य कारणं साधुशब्द एव । साधुशब्दस्य कारणं व्याकरणं भवति । व्याकरणं बिना शब्दानां तत्त्वावबोधस्यानुपपत्तेः । यथा चोक्तं भर्तृहरिणा -

---

1- वाक्य पदीये ब्रह्मकाण्डं श्लोक ।। पृ० 20

2- पातजंल महाभाष्ये प्रथमाह्निकम् ।

अर्थ प्रवृत्ति तत्त्वानां शब्दा एव निबन्धनम् ।
तत्त्वावबोध: शब्दानां नास्ति व्याकरणाद् ऋते ।।[1]

वैयाकरणा एव "इन्द्रशत्रु र्विवर्द्धस्व" इत्यत्र समासस्वरं निश्चेतुं पारयन्ति। अत एव व्याकरणस्य पंचविधेषु प्रयोजनेष्वन्यतमं प्रयोजनं रक्षेति स्वीक्रियते ।

मुनिवर: पतंजलि जगाद-

"रक्षोहागमलघ्वसन्देहा: प्रयोजनम्"[2]

रक्षार्थं वेदानामध्येयं व्याकरणम् । यो हि व्याकरणं जानाति स एव शास्त्रान्तरेषु प्रवेष्टुं शक्नोति । यो व्याकरणं न वेत्ति स कथमपि शास्त्रान्तरेषु प्रवेष्टुं न शक्नोति । शब्दस्य शास्त्रन्तरस्य रहस्यं ज्ञातुं प्रभवति । यथा आह-

यो वेदनयनं सदनं हि सम्यग् ब्राह्मण: स वेदमपि वेद किमन्यशास्त्रम्।
यस्मादत: प्रथममेतदधीत्य धीमान् शास्त्रान्तरस्य भवति
श्रवणेऽधिकारी ।।[3]

वैयाकरण एव स्वजन: श्वजन:, सकलम् शकलम्, सकृत् शकृत्, इत्येतेषां शब्दानार्थं भेद पूर्वकं ज्ञानं कर्तुं शक्नोति । यथोक्तम् -

---

1- वाक्यपदीये ब्रह्मकाण्डम् श्लोक 13 पृ0 23

2- व्याकरण महाभाष्ये प्रथमाह्निकम् ।

3- भास्कराचार्यस्य सिद्धान्त शिरोमणौ गो0अ0गो0पृ0 श्लोक 8 पृ0 146

'यद्यपि बहुनाऽधीषे तथाऽपि पठ पुत्र व्याकरणम् ।

स्वजनः श्वजनो मा भूत् सकलः शकलः सकृच्छकृत्'।।[1]

कि बहुना-चतुर्षु पुरुषार्थेषु धर्मार्थकाममोक्षेषु यो हि मोक्षरूप पुरुषार्थस्तस्य प्राप्ति वैयाकरणैरेव क्रियते । यतोहि शब्दशास्त्रे -'अनादि निधनं - ब्रह्म शब्दतत्त्वं यदक्षरम्'। तदेव ब्रह्म तत्त्वमिति कथ्यते । शब्द ब्रह्म-तत्त्वं वैयाकरणैः प्राप्यते । शब्द ब्रह्मविद् ब्रह्मैव भवतीति । अमुष्यैव - मोक्षत्वे व्यवहारो भवति । तथा च मोक्षार्थिनां कृते व्याकरणमिदं - प्रथमं सोपानं वरीवर्ति यदारूह्य- शब्द ब्रह्मणः प्राप्तिर्भवति । यथोक्तं भर्तृहरिणा -

"इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् ।

इयं सा मोक्ष माणानामजिह्ना राजपद्धतिः।।[2]

व्याकरणशास्त्रस्यादिमोपदेष्टा ब्रह्मा, ब्रह्मा बृहस्पति-मुपादिदेश । बृहस्पतिरिन्द्रम्, इन्द्रोभरद्वाजम्, भरद्वाजः ऋषीन् ऋषयो ब्राह्मणान्/एवं क्रमेण व्याकरणज्ञानस्य प्रचारः प्रसारश्च समजायत । यथोक्तमृक तन्त्रे -

"ब्रह्मा बृहस्पतये प्रोवाच बृहस्पतिरिन्द्राय इन्द्रो भरद्वाजाय, भरद्वाजः ऋषिभ्यः ऋषयो ब्रह्मणेभ्यः इति" ।

----------------

1- प्रकीर्णोऽयं श्लोकः।

2- वाक्यपदीये ब्रह्मकाण्ड श्लोक 18 पृ0 25

एव रीत्या सङ्क्षेपेण व्याकरणशास्त्रस्य परिचय: प्रदत्त: ।
सम्प्रति संक्षेपेण व्याकरणस्य शाखा विचार: प्रस्तूयते -

व्याकरण शास्त्रस्य शाखापरिचय:

व्याक्रियन्ते विविच्यन्ते व्युत्पाद्यन्ते वा प्रकृति प्रत्ययादि - द्वारा शब्दा येन तद् व्याकरणमिति । कथनेन विषयदृष्ट्या व्याकरणं - कर्तृभेदेन नैकविधं वर्तते इति तु विदितमेव यत्सर्वासां विधानामादिस्रष्टा- ब्रह्मैव । ब्रह्मण आरभ्य अद्यावधि बहुविधा व्याकरण प्रवक्तार: रचयिता- रश्चाभवन् । केचन व्याकरणं द्विधा विभाजयन्ति यथा -

(1) ऐन्द्र-सम्प्रदाय: ।

(2) माहेश्वर-सम्प्रदायश्च ।

ऐन्द्र-सम्प्रदाये कातन्त्रप्रभृतय: सन्ति ।

आधुनिकैर्विद्वद्भिरष्टविधं व्याकरणं स्वीक्रियते यथा -

ब्राह्ममैशानमैन्द्रश्च प्राजापत्यं बृहस्पतिम् ।
त्वाष्ट्रमापिशलंचेति पाणिनीयमथाष्टमम् ।।

बोपदेवीस्त्वत्थमाह -

इन्द्रश्चन्द्र:काशकृत्स्नाऽऽपिशली शाकटायन: ।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टौ हि शाब्दिका: ।।

अपरे विपश्चितो नवविधं व्याकरणं स्वीकुर्वन्ति रामायण- स्योत्तरकाण्डे सोऽयं नव व्याकरणार्थ वेत्तेत्युक्त्वा नवव्याकरणं - प्रतिपादितम् ।

गीतासार नामके ग्रन्थेऽपि नवव्याकरणस्य चर्चाविधतेतथा — श्री तत्त्वनिधिनामके वैष्णवग्रन्थे नव-व्याकरणानामित्थं निर्देशः प्राप्यते- यथा -

ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम् ।
सारस्वतं चापिशलं शाकल्यं पाणिनीयकम् ।।
इत्थं नवविधं व्याकरणमतिप्रसिद्धिं गतम् ।

§1§ ऐन्द्र व्याकरणम् - इदानीमिदं व्याकरणं दुर्लभमेव वर्तते । व्याकरणमेतद् दृष्टान्तत्वेन नैकेषु देशेषु दृष्टिपथं समायाति ।

शाकटायनादि व्याकरणेषु ऐन्द्र व्याकरणस्योद्धरणानि — संगृहीतानि सन्ति । डा० बेल्वल्कर महाभागस्तु कातन्त्र व्याकरणमेव — ऐन्द्र तन्त्र-व्याकरणं मनुते । महाभारतस्य टीकाकारः श्री देवबोधः — ऐन्द्र व्याकरणस्य विषये इत्थमुवाच यथा -

"यान्युज्जहार माहेन्द्राद् व्यासो व्याकरणार्णवात् ।
पदरत्नानि किं तानि सन्ति पाणिनिगोष्पदे ।।

वचनेनानेन प्रतीयते यदैन्द्रं व्याकरणमतिविस्तृतमासीत् । कथासरित्सागरानुसारेणैन्द्र व्याकरणं प्राचीन काले नष्टमभवत् किन्तु सम्प्रति — ऐन्द्र व्याकरणस्य सूत्रद्वयं समुपलभ्यते ।

व्याकरणस्यास्य प्रथमं सूत्रम्- अर्थःवर्ण समूहे । द्वितीयं सूत्रम्- अर्थः— पदम् ।

अस्य पिता कृशाश्व: माता चादितिरिति । एकादशभ्रातरोऽस्य — आसन् । नाना शास्त्राणामुपदेशक: इन्द्र इति । दीर्घायुत्तत्रभवानिन्द्ररिति । अस्य जीवनकालावधि: पंचशतवर्षाणि आसन्निति वदन्ति जना: ।

﴾2﴿ चान्द्र-व्याकरणम्-

चन्द्र गोभिरचितं चान्द्र-व्याकरणम् । सम्प्रति व्याकरण — मिदमपूर्णमेवोपलभ्यते । व्याकरणस्यास्यनिर्माणे पातंजलमहाभाष्यस्यापि — प्रभाव: स्पष्ट तया - परिलक्ष्यते । चान्द्र व्याकरणस्य प्रथम श्लोकेन — बौद्धमतावलम्बीति प्रतीयते महानुभावोऽयम् । चान्द्रव्याकरणकृदेवोपज्ञवृत्ते-रामुखे निगदति- "यन्मदीय मिदं व्याकरणं क्रियाकारक मिति लघुविस्पष्ट-सम्पूर्णमुच्यत" इति ।

चन्द्रगोभि महाभागेन बहुषु स्थलेषु भाष्यमतंपरित्यज्य अन्येभ्यो — व्याकरणेभ्य: नैकानि प्रमाण वचनानि - संकलितानि अकारि । जर्मनीदेशे — यच्चान्द्र व्याकरणं प्रकाशितं तत्सर्वथाअपूर्णमेव । तत्र स्वरप्रक्रियाभागो नास्ति । सम्प्रति व्याकरणस्यास्य पठन पाठन परम्परा परिहीयते । व्याकरणमिदं — वैक्रमस्य सहस्राब्दात्पूर्वमासीत् ।

﴾3﴿ <u>काशकृत्स्न:</u>

काशकृत्स्न: प्रमुखेषु व्याकरणेष्वतिमहत्त्वं स्थानं प्राप्नोति । पतंजले — र्महाभाष्यस्य प्रथमाह्निकस्यान्ते अस्याप्युल्लेखो वर्तते । बोपदेवेनैव कालिक —

कल्पद्रुमग्रन्थे काशकृत्स्नेन सहिता: अष्टौ शाब्दिकानिर्दिष्टा: । अधुना — काशकृत्स्नकृत: धातुपाठस्तथा च व्याकरणमपि प्राप्यते । काशकृत्स्नकाश-कृत्स्नशब्दयोर्मध्ये केवलमपत्यप्रत्ययस्यैव भेदो वर्तते । उभावप्येकमेवाचार्य — निर्दिशत: काशकृत्स्नशब्दस्य व्युत्पत्तिं गणरत्नमहोदधौ इत्थं प्रदर्शयति— कशाभि: कृन्तन्ति कृते वस्ने "ङयादत्वे च ह्रस्वश्च बहुलम्" इत्यनेन सूत्रेण — ह्रस्वत्वमिति काशकृत्स्न: । अस्य गुरु— भार्गव: । भट्टपराशरस्तु बादरायणस्य — शिष्योऽयमिति प्रतिपादितवान् । कन्नमलेन प्रोक्तं कात्स्नं — व्याकरणम् । कन्नड़ भाषायामपि व्याकरणस्यास्य सूत्राणि समुपलभ्यन्ते ।

काशिकावृत्तौ- पूर्वकाशकृत्स्ना अपरकाशकृत्स्नेति शब्दौ कथितौ। अयम्महाभाग: 3100 विक्रमाब्दात्प्रागेवासीत् ।

§4§ <u>कातन्त्रम्-</u>

व्याकरणशास्त्रे कातन्त्र-व्याकरणस्यातिविशिष्टं स्थानं — वरीवर्ति । व्याकरणमिदं कश्यपकशब्देनापि ज्ञायते । कातन्त्रं — काशकृत्स्नतन्त्रस्यैव लघुरूपं वर्तते । कुमार-कार्तिकेयस्यादेशेन शर्ववर्मा — व्याकरणमिदं निर्ममौ । कौमारतन्त्रमपि नामवर्तते । भागद्वये विभक्तमिदं — व्याकरणम् । तत्र प्रथमो भाग: आख्यातान्त:, द्वितीयश्च कृदन्तान्त: । कथासरित्सागरमधिकृत्य कातन्त्र व्याकरणस्य पूर्वभागस्य रचयिताशर्ववर्मेति — वक्तुं शक्यते । अपरस्य कृदन्तभागस्य कर्ताकात्यायन: आसीत् । अस्य कालसम्बन्धे बहुविधा विवादा: सन्ति । अत एव कालनिर्णयो दु:शक्य: ।

5) शाकटायन:

पाणिनिना स्वाऽष्टाध्याय्यां शाकटायनस्य नाम त्रिवारमुद्धृतम् ।[1] "वाजसनेये ऋक् प्रातिशाख्येचापि शाकटायनस्य निर्देशो वर्तते । यास्कोऽपि स्वनिरूक्ते शाकटायनस्यमतं प्रादर्शयत् । पतंजलिरपि — एनं व्याकरणशास्त्रप्रवक्तारं मनुते । एवमेतस्य वैयाकरणत्वं सुनिश्चितमेव ।

पतंजलि: अस्य पितुर्नाम शकट इति कथितवान् । पाणिनि: शकट—शब्दं नडादिगणे पठितवान् । "नडा दिभ्य: फक्" इति फकि कात्यायना-देशे सति शाकटायनशब्द: सिद्ध्यति । कोऽपि काण्वस्य शिष्योऽयमासीदिति कथयति ।

"शैशिरस्य तु शिष्यस्य शाकटायन एव च" इति वचनेन शैशिरि शिष्य: आसीत् इति ज्ञायते । अयं महावैयाकरण: शाकटायन: सकलान् नामशब्दान् आख्यातवान् इति स्वीचकार। महाभागस्यास्यमहत्त्वपूर्णं व्याकरण-शास्त्रमासीत्, किन्तु इदानीं शाकटायनस्य व्याकरणं नोपलभ्यते ।

यत्र तत्रास्य स्वरूपमुपलभ्यते । अत्र लौकिकानां वैदिकानांच पदानामन्वाख्यानं विस्तरेण वर्तते । व्याकरणस्यास्य वैशिष्टयमदसीयमते त्रिविध: शब्द: (1) जातिशब्द: (2) गुणशब्द: (3) क्रियाशब्दश्चेति ।

---

1- लङ: शाकटायनस्य 3/4/111

2- व्योर्लघुप्रयत्नतर: शाकटायनस्य 8/3/18

3- त्रिप्रभृतिषु शाकटायनस्य 8/4/50

अस्य मते उपसर्ग संज्ञा पंचविंशति शब्दानामस्ति ।

§6§ सारस्वतम्

प्राप्त सरस्वती प्रसादेनानुभूति रूपेणसारस्वत व्याकरणस्य रचना विहितेति व्याकरण जगति प्रसिद्धं किन्तु नायं ग्रन्थकर्ता अपितु टीकाकार आसीत् - यथा ज्ञायते ग्रन्थस्यास्य प्रथमश्लोकेन -

प्रणम्य परमात्मानं बालधीवृद्धिसिद्धये ।

सरस्वतीमृजुं कुर्वे प्रक्रियां नातिविस्तराम् ।।[1]

परमग्रे क्षेमेन्द्रोऽपि सारस्वतस्यटिप्पणस्यान्ते निगदति - इति नरेन्द्राचार्य कृते सारस्वते क्षेमेन्द्र टिप्पण समाप्तमिति कथनेन सारस्वत-व्याकरणकर्ता नरेन्द्राचार्यो बभूव ।

अमरभारती महाभागोऽपि एवं प्रतिपादयति"यन्नरेन्द्र-नगरि - प्रभाषितं यच्च वैमलसरस्वतीरितम्"।

तन्मयात्र लिखितं तथाधिकं किंचिदेव कलितं स्वयाधिया ।।

अत एतैः प्रमाणैर्निर्णीयते यदयमेव सरस्वतव्याकरणस्य कर्ता नरेन्द्राचार्यो वरीवर्ति । सम्प्रति व्याकरणस्यास्य प्रचारो यत्र तत्र दृश्यते । एवंच नैकेषु क्षेत्रेषु अध्ययनाध्यापनादिप्रक्रियाऽपि एतेनैवाऽक्रियते । सरलतमन्नाति दीर्घमस्य वैशिष्टयं सुस्पष्टमेवास्ति । अस्य कालोवैक्रमाब्दस्य 1250 वर्षे आसीत् ।

7- आपिशलि:

पाणिनिना अष्टाध्याय्यामेकवारं स्मृतः आपिशलि:[2] ।

---

1- सारस्वत व्याकरणे पूर्वार्द्ध प्रथम श्लोक:

2- पाणिनेरष्टाध्याय्यां सूत्र संख्या "वा सुप्यापिशले:" 6/1/92

काशिकादिष्वनेकेषु ग्रन्थेषु बहुधा चर्चित: । महानुभावस्यास्य व्यक्तित्वं – विलोक्य इदमेव प्रतिभाति यदयं महान् व्याकरणमर्मज्ञ आसीत् ।

अपिशलस्यापत्यमिति आपिशलिराचार्य: ।

अनेन ज्ञायते यदस्य पितुरभिधानमापिशलि इति ।

शाकटायन-व्याकरण वृत्तौ आचार्य: पल्यकीर्ति गदति – यदष्टका आपिशलि-पाणिनीयाइति । इत्थं वयं निश्चनुम यदापिशलि-व्याकरणमष्टाध्यायी परिमितमिति ।

कात्यायनस्य पतञ्जलेश्च काले सुतरामस्य प्रचार: प्रसारश्चासीत् । तदानीं कुमारिका-प्रभृतयोऽपि अस्याध्ययनं चक्रु: । आपिशलमधीते आपिशला – ब्राह्मणी । मन्ये नियमेषु सरलत्वाद् व्याकरणमेतत् शाल प्रभृति सुकुमार-प्रभृतीनां प्रियतरमासीत् ।

आचार्यवर आपिशलि-र्विक्रमाब्दात् त्रिसहस्रवर्षेभ्य: पूर्वमेवासीत् ।

8) <u>शाकल्य:</u>

आचार्य शाकल्यस्य मतं चतुर्षु सूत्रेष्वष्टाध्याय्यां प्राप्नुते । शौनक-ऋक्-प्रातिशाख्ये कात्यायनस्य, वाजसनेय–प्रातिशाख्ये च – शाकल्यस्य-मतानि उद्धृतानि सन्ति एवमस्यान्यत्रापि मतमुपलभ्यते ।

शाकल्य: शाकलनाम्नाऽपि ज्ञायते, नानयोर्भेदोवर्तते । शकलस्य पुत्र: शाकल्य: अत्रगर्गादिभ्यो यञ्[1] इति यञि कृते रूपं सिद्ध्यति ।

---

शाकल्य-व्याकरणे लौकिकानां वैदिकानांच शब्दानांविस्तरेण विवेचनं-वर्तते ।

अस्यान्ये ग्रन्था: शाकलचरणम्, ऋग्वेद-पदपाठ: माध्यन्दिन-पदपाठश्च । अस्य कालो - वैक्रमाब्दात् शताधिकत्रिसहस्र §3100§ वर्षेभ्य: -प्रागेवासीत् ।

9§ पाणिनि:

व्याकरण-जगति पाणिने र्व्याकरणं सर्वेषु व्याकरणेषु मूर्धन्यं मन्यते। प्रायश: काल-क्रमेण नैकानि व्याकरणानि लुप्तं गतानि पाणिने: पूर्वाणि -पराणि च । किन्तु पाणिनि-व्याकरणं सर्वाधिकं लोकप्रियं सुरुचिकरं -प्रतिभाति सर्वत्र ।

विश्वभाषासु पाश्चात्या विपश्चित: व्याकरणमिदं सर्वात्मना -स्वीकुर्वन्ति आद्रियन्ते च ।

भट्टोजिदीक्षितस्य कौमुद्यां माहेश्वराणि सूत्राण्यणादि -संज्ञार्थानीति वचनेन प्रतीयते यद् - व्याकरणस्यास्य सम्बन्धो माहेश्वर-सम्प्रदायात् समागच्छति ।

महर्षि पाणिनेरष्टकं विश्वविश्रुतं व्याकरण-पुस्तकं वरीवर्ति । अपराभिधेयेनापि अष्टाध्यायी, शब्दानुशासनम्, वृत्ति-सूत्रंच । अष्टस्वध्यायेषु - विभक्तमष्टकमष्टाध्यायी चेति प्रसिद्धम् ।

पाणिनेरष्टकस्यानेकविधं नैकवारं प्रवचनं जातम्- प्राच्यपाठः, उदीच्यपाठः, दाक्षिणात्यपाठश्चेति समुपलभ्यन्ते, विषयेऽस्मिन्नेषाभणितिः समीचीना वर्तते ।

यतः—रहितसूत्रेषु पंच सूत्र विवर्जिता
अष्टाध्यायी समाख्यातेति ।

नागेश भट्टस्य परिचय:

यद्यपि विविध विद्याविलासोल्लसित बुद्धिवैभवशाली वैयाकरणकुल-मान्यो नागेश: कदा भारतवर्षं स्वजन्मना अलंकृतवान् इति निश्चयावसरे सर्वैरपि-इतिहासज्ञै: प्रबल प्रमाणत्वेन किंचिदपि कुत्रापि नोप स्थापितन्तथापि-पण्डित राज जगन्नाथ रचित रसगंगाधर ग्रन्थस्यमर्म-प्रकाश नामक टीकाया: -कर्ता नागेश एवेति सर्वैरेवेतिहासज्ञै: स्वीक्रियते । पण्डितराजस्तु शाहजहाँभिधेयस्य -दिल्लीश्वरस्य यवनाधिपते: संसदि आसीत् । तत एव पण्डितराजपदवीं च लब्धवान्। यवनाधिपते: शाहजहाँभिधेयस्य च राज्य समय: 1628-1658 ख्रिस्टाब्द आसीदिति-इतिहास विदां परामर्श: ।

एतावता वक्तुमिदं शक्यते यदयमेवकाल: पण्डितराज जगन्नाथस्यासीत् । एवंच पण्डितराज कृत रसगंगाधरस्य मर्म प्रकाशाख्यटीकाया: कर्तुर्नागेशस्य काल-स्तदुत्तरमेव निश्चेतुं शक्यते । अन्यच्च नागेशस्य गुरो: पितु: श्री भानुदत्त -दीक्षितस्य सामयिक एव पण्डितराज इत्यपि प्रमाणीकुर्वन्तीतिहासज्ञा: ।

अत: पण्डित राजात् प्राय: पंचाशद् वर्षेभ्य: पश्चादस्य महानुभावस्य -नागेशस्य जन्म इत्यनुमान प्रमाणेन निश्चप्रचम् ।

इत्थमष्टादश शताब्दस्य प्रारम्भ एवास्य महापुरुषस्य जन्म काल -इति निश्चीयते । किंचापरमपि प्रमाणमत्रेतिहासज्ञा: उपस्थापयन्ति । तच्चेदं -जयपुराधीशेन श्री सवाई जयसिंह वर्ममहोदयेन अश्वमेधयज्ञप्रसंगेऽयं महानुभावो नागेश -

आमन्त्रित आसीत् । आमन्त्रितोऽपिनागेशः "अहं क्षेत्र संन्यासं गृहीत्वा –
काश्यां स्थितोऽस्मि, अतः काशीं परित्यज्य नान्यत्रगन्तुं शक्नोमि इति –
तदाऽऽमन्त्रणमस्वीकृतवान् । जयपुराधीशस्तु 1714 खिष्टाब्दे अश्वमेधयज्ञं –
समारब्धवान् इति महामहोपाध्याय दुर्गाप्रसादशर्मणो लेखादवगम्यते । अतः –
प्रमाणेनानेनापि नागेशस्य कालोऽष्टादश-शताब्दस्य प्रारम्भ एव आयाति।

महानुभावस्यास्य माता सतीदेवीपिता च शिवभट्टः इति विदितमेव –
तत्र भवतां वैयाकरणाग्रणीनां विदुषाम् । स्वयं चानेन लघुशब्देन्दु शेखरस्य –
मङ्गल श्लोके प्रतिपादितम्.-

पातंजल महाभाष्ये कृतभूरिपरिश्रमः ।
शिवभट्टसुतोधीमान् सतीदेव्यास्तु गर्भजः ।। इति ।।

भट्ट नागेशस्य विद्यावंशवृक्षः
--------------------

रामाश्रमः
।
हरिदीक्षितः
।
नागेशः
।
वैद्यनाथः बालशर्मा

मन्नुदेवः

-----------------

1- द्र० संस्कृत व्या० शा० इतिहासः प्र० भा० पृ० 425

नागेश समये हि नव्य न्याय प्रसूताया: अवच्छेकावच्छिन्नेत्यादि शब्द घटिताया भाषाया: प्रवाहोमहता वेगेन प्रचलित आसीदिति तदानीन्तना: — त एव ग्रन्था: प्रशंसा योग्या: मन्यन्ते स्म । ये नव्य न्याय प्रविष्ट — आसीत् किन्तु ब्रह्मानन्दसहोदर-रसानुभूति सम्पादक साहित्य शास्त्रेऽपि — नव्यन्याय प्रवाहस्तदानीं दृश्यते स्म ।

अतो नागेशेनापि नव्यन्यायभाषा-व्यवहारेण स्वकीय-तर्क — शास्त्र-पाण्डित्यमपिनैकश: प्राकाश्यत । दिङ्मात्रं यथा -

(1) अन्वयितावच्छेदकावच्छेदेनान्वये एवकारस्तात्पर्य-ग्राहक इति — विभक्तित्वावच्छेदेन सारूप्यान्वयो लभ्यते ।[1]

(2) यत्प्रतिपादितार्थ-विषयक भावनात्वं चमत्कारजनकतावच्छेदकं — तत्त्वम् ।[2]

(3) तद्धर्मावच्छिन्न विषयक शाब्दत्वावच्छिन्नंप्रति तद्धर्मावच्छिन्न-निरूपितवृत्ति विशिष्ट ज्ञानं हेतु: ।[3]

एतेन ज्ञायते यन्नागेशभट्टस्य पाण्डित्यं पाणिनीय-व्याकरण — सम्प्रदाये प्राचीन-नव्य-व्याकरणयो: तथा च 'पातंजल महाभाष्ये कृतभूरिपरिश्रम:' नैयायिकश्चासीत् । एवंच साहित्यधर्मशास्त्रालंकार-सांख्य योग पूर्वोत्तर मीमांसा ज्योतिष प्रभृति शास्त्रेषु पण्डित तल्लज आसीत् ।

------------------

1- द्र0 बृह0 शब्देन्दु0 अ0प्र0भा0पृ0 364

2- द्र0रसगंगाधर प्र0आ0पृ017

3- द्र0पर0मंजूषा पृ08

विविध शास्त्रेनानेन बहवो ग्रन्था ग्रथिता: । तेषां ग्रन्थानां नामानि अधोऽङ्कितानि इदानीमपि उपलभ्यन्ते यथा -

(1) भाष्य प्रदीपोद्योत: ।

(2) काव्यप्रदीपोद्योत: ।

(3) लघुशब्देन्दु शेखर: ।

(4) बृहच्छब्देन्दु शेखर: ।

(5) परमलघुमंजूषा ।

(6) बृहन्मंजूषा ।

(7) लघुमंजूषा ।

(8) परिभाषेन्दु शेखर: ।

(9) प्रायश्चित्तेन्दुशेखर: ।

(10) परमार्थसार विवरणम् ।

(11) योग सूत्र वृत्ति: ।

(12) दुर्गासप्तशतीटीका ।

(13) रसगंगाधरमर्मप्रकाश: ।

(14) रसतरङ्गिणी ।

(15) रसमंजरी टीका ।

(16) वृत्ति संग्रह: ।

(17) वेदान्तसूत्रवृत्ति: ।

(18) सांख्य सूत्रवृत्ति: ।

(19) सापिण्ड्य-निर्णय:

(20) एकश्रुतिवाद:,

(21) वाल्मीकीय रामायणटीका

(22) अध्यात्मरामायणटीका च ।

केचित्तु शब्दरत्नमपि नागेशस्यैव वदन्तीति तत्रेति हासज्ञा: — एव प्रमाणभूता: ।

नैकेषां विदुषां लेखेभ्यो ग्रन्थ-नामानीमानि नागेशस्य सन्ति — यथा -

(1) वैयाकरण सिद्धान्त मंजूषा,

(2) लघुशब्दरत्नम्,

(3) अष्टाध्यायी सूत्रपाठ:,

(4) तिङन्त संग्रह:,

(5) धातु वृत्ति:,

(6) वैयाकरण कारिका,

(7) वृत्तिवाद:,

(8) शब्दरत्न सागर समुच्चय;,

(9) सुप्तिङन्तसागर-समुच्चय:,

(10) विषमपदी (शब्द कौस्तुभटीका",

(11) वैयाकरण कारिका:,

(12) स्फोटवाद:,

(13) अलंकार सुधा (कुवलयानन्द टीका),

§14§ गुरू काव्य प्रदीपोद्योत:,

§15§ गुरू मर्म प्रकाश:,

§16§ लघु काव्य प्रदीपोद्योत,

§17§ रसतरङ्गणी टीका,

§18§ तिथीन्दु शेखर:,

§18§ चण्डी स्तोत्र प्रयोगविधि:,

§20§ आचारेन्दु शेखर:,

§21§ अशौच निर्णय:,

§22§ कात्यायनी तन्त्रम्,

§23§ इष्टकाल निर्णय:,

§24§ प्रयोग तरणि:,

§25§ लक्षण रत्न माला,

§26§ सपिण्ड मंजरी,

§27§ तर्क भाषा टीका,

§28§ तात्पर्य दीपिका,

§29§ प्रभाकर चन्द्रतत्त्व दीपिका,

§30§ पदार्थ दीपिका,

§31§ पातंजल सूत्र वृत्ति भाष्यच्छाया-व्याख्या,

§32§ व्यास सूत्रेन्दु शेखर:,

§33 § वेदसूक्त भाष्यम्,

§34§ लघुसांख्य सूत्र वृत्ति:,

§35§ प्रत्याख्यान संग्रहः,

§36§ श्राद्धेन्दु शेखरः,

§37§ कालेन्दु शेखरः,

§38§ गीत गोविन्द टीका,

§39§ सुधालहरी-टीका,

§40§ पातंजल सूत्र वृत्तिः,

एवं विविध गुणविशिष्टस्य विद्वज्जनलब्ध प्रतिष्ठस्यापि — नागेशस्य सन्ततिर्नासीदिति-

"शब्देन्दु-शेखरं पुत्रं मंजूषां चैव कन्यकाम्" ।

इत्यादिकया मंजूषान्तं तदीयोक्त्यैव निर्णेतुं शक्यते । अतः परं न किंचिद् — वक्तुं शक्यते महानुभावस्यास्य जन्मादि विषये । मन्ये यत् तस्मिन्समये — ग्रन्थकाराणां जन्मादिज्ञानसूचकलेखन-प्रणाली एतादृशी नासीद् यादृशी— इदानीमुपलभ्यते ।

अतः परम्परा-दोषेणैव बहूनां प्राचीनानां महापुरुषाणां वास्तविकमितिवृत्तमज्ञातमेवेति विभावयन्तु सुधियः ।

भूमिका टीकाकारस्य परिचय:

भारतवर्षस्य मानचित्रे कोंकण देश: भौगोलिक दृष्ट्या परम महत्त्व-माधत्ते, महाराष्ट्र राज्यान्तर्गते सह्याद्रिपर्वतस्य पश्चिमतस्तथाब्धौ समुपल-भ्यमान: प्रदेश अधुना कोंकण संज्ञया ज्ञायते । प्रदेशस्यास्य शर्करिलत्वाद पाषाण-मयत्वाच्च नायमुर्वरो देश: पुराणेषु देशस्यास्य नामान्तरं परशुराम क्षेत्रमिति-प्रसिद्धम् । यस्मादिदं स्थानं परशुरामेणसमुद्राद्‌बलादाहृत्य जनपदत्वेन परिणमित-मासीद ।

अत्रत्या लोका व्यवहारविद: कूटनीतिज्ञाश्चतुराश्च सन्ति । अस्य भूमे: प्राय: शर्करिलत्वेऽपिऊसरत्वे जलवायोर्वातावरणस्य प्रातिकूल्येनापि-अत्रोद्‌भवानां लोकानां मस्तिष्कं सुस्थितं पाण्डित्यपूर्णमविकृतंचास्ति । महाराष्ट्र-शासनस्य संचालका: पूर्वमत्रैवाग्रे जन्मान: पेशवेत्युपाधिधारिण: प्रादुर्बभूवुरिति ।

लेखस्यास्य चरित नायकस्तात्येत्यपराभिधान: श्री राम कृष्ण शास्त्री — महाराष्ट्रिय कोंकण ब्राह्मणोऽस्ति । अस्य पूर्वजा: अस्मिन्नेवकोंकणदेशे — न्यूषुरिति अथासौ जन्म मूल स्थानं कोकणमुज्झित्वा स्व भाग्यं परीक्षितुं — महाराष्ट्रियं सतारा-प्रदेशं स्व-निवासाय जगाम । सताराप्रदेशोऽयं स्वकर्म-क्षेत्रत्वेनैभि: निर्धारित: । अत्रैव पर्वत-शिखरे विराजमानां देवीं पार्वतीं — स्वेप्सित-सिद्धये निरन्तरमाराधयामास, येन परितुष्टा देवी अस्येप्सितं — पूरयामास।' फलत: महाराष्ट्र-शासनस्य जन्मदातुर्नायकस्य श्री शिवाजी-महानुभावस्य राज्यसभां समाशिश्रिये ।

अथ महाराष्ट्रनायकः श्री शिवाजी महोदयः एषां पाण्डित्येन बुद्धेस्तैक्ष्ण्येन च प्रभावितो भूत्वा प्रधानराजपण्डितपदे तं न्ययूयुजत् ।

अत्रान्तरे सामन्तो रघोजी नामा श्रीशिवाजी प्रभुं साक्षात्कर्तुं राजसभामासेदे । गुण ग्राहिणा श्री शिवाजी प्रभुणा नागपुरे राज्यकार्यं निर्वोढुमयं श्री कृष्णशास्त्री समादिष्टोऽभूदिति ।

तत्रासौ रघोजी भोंसले महानुभावेन कोषाध्यक्षपदे नियोजितः। अथ पदेऽस्मिन् नियुक्तः स्वकार्यं महता कौशलेन निभालयामास, परं — किंचित्कालानन्तरमेव पंचत्वं प्राप ।

अथास्य पाणिगृहीती वैधव्यमापन्ना पत्युः स्मारकत्वेन कृष्णेश्वराभिधं मन्दिरं नागपुरे प्रतिष्ठापयामास । यत्त्वद्यापि तदीय — स्मारकत्वेन नागपुरे समुल्लसति ।

अथ शास्त्रिमहोदयानां स्वरारोहानन्तरं तस्यभ्रातुः स्नुषा — "बहिणा बाई" स्वकीयां प्रभूतां सम्पत्तिमादायनागपुरतः काशीमेत्य — तत्रैवोवास। स्वनिवासहेतोस्तत्रैवदुर्गाघट्टे गंगायास्तटे स्वकीयं भव्यभवनं — निर्मापयामास । यत्त्वद्यापि तत्र समुपलभ्यते । अस्यैव भवनस्याभ्यन्तरे — सा बालकृष्णेश्वरस्य भव्यां मूर्तिं प्रतिष्ठापितवती । इत्थं तात्या-शास्त्रिणः — पूर्वजा नागपुरतः काशीमेत्यन्यूषुः । अस्या बहिणाबाई देव्या देवरः बालकृष्णभट्ट इत्यासीत् । अयमेव शास्त्री तात्यापरनामाभिधानस्य — रामकृष्णस्य जनक इति बभूव । तस्य सुतद्वयमभूत् ययोरेको बालम्भट्टापरपर्यायो

महादेवभट्टः अपरश्च नागेश्वरभट्टः अनयोर्महादेवभट्ट एव शास्त्री तात्या-महोदयस्य जनको बभूव । महादेवभट्टस्य स्वरारोहणानन्तरमस्य पालनं-पोषणं पितृत्वेनास्य पितृव्यो नागेश्वरश्चकार । तात्याशास्त्री च नागपुर-एव जन्म लेभे । अथास्य दुर्दैवविपाकादेवास्य पितरावकाल कवलितौ बभूवतुः। पंचवर्षपर्यन्तमसौ बाल्ये नागपुर एव मातृभाषां महाराष्ट्रियमसौ शिशिक्षे ।

महादेवभट्टोऽपि यावज्जीवं कोषाध्यक्षपदमलंचकार ।

अनन्तरमस्य पितृव्यपादाः श्री नागेश्वरभट्ट महोदयाः-स्वात्मना सार्धमेवैनं पुनः काशीमनयत् तत्रैव स्वीये कुटुम्बे सुखेनैनं पालयामास पोषयामास च । अष्ट वर्ष देशीयोऽयं पुनः काश्यामध्ययनाय-समगच्छत्, यत्रासौ कर्मकाण्डस्य वेदानांच सुसूक्ष्मं परिशीलनं चकार वर्षद्वयं-यावत् । अथासौ विद्यायाः ताड्गान् विषयानध्येतुं श्री बालशास्त्रिणामन्तेवासित्वमाशिश्रिये । अस्मात्पूर्वमेभिः "रवेरे" इत्युपनामकाद् विदुषः-सकाशाच्च काव्य-कोशादि-ग्रन्थाः सुचारूरूपेण सम्यक्तया अधीता आसन् । इत्थं द्वादशभिर्वर्षैः समापनीयान् प्रायः समग्रान् विषयान् पूर्व निर्दिष्टाद् गुरोः सकाशादेवाधिजगे केवलं वर्ष षट्केनैव । असौ सुगूढं समग्रं व्याकरणशास्त्रंचापि साकल्येन पारिपूर्ण्येन च स्वल्पेनैवानेहसासमीचीनतया परिशीलयाम्बभूव, येनैतदीयो दैशिकप्रवरोऽपि विस्मितो अवतिष्ठते स्म । स्वाध्यायाद् विरम्यासौ काश्यामेव दरभंगा नरेशस्य पाठशालायामध्यापकत्वं-प्राप । यत्रासौ मैथिलाननेकान् छात्रान् दीक्षयित्वा स्नातकानकरोत् ।

अथ तदानीन्तनेन वाराणसी गवर्नमेंट-संस्कृत कालेज इत्याख्यस्य-महाविद्यालयस्य प्राचार्येण श्री थीबू महोदयेन श्री तात्यामहोदयस्य वैदुष्येण-पदवाक्य प्रमाण ज्ञत्वेन च प्रभावितेनायं गवर्नमेण्ट-कालेजे व्याकरणाध्यापकपदे-महतादरेण नियोजितोऽभूत् ।

यत्रासौ प्रायेणै कोन चत्वारिंशद् वर्षाणि यावद् व्याकरण-विषयमध्यापयामास । यावज्जीवमसौ पूर्वोक्ते संस्कृत-महाविद्यालये-व्याकरणविषयाध्यापन-निरतो कालं निनाय ।

राम कृष्णाभिधानस्तात्याशास्त्री-महोदयः शास्त्रेषु यादृशं नैपुण्यमवहति स्म, तादृशमेव वैदुष्यं लोकव्यवहारेऽपि धत्ते स्म । व्याकरण शास्त्रे अनेन महाविदुषा गरिमा प्रौढिमा च नितान्तमधिगता-आसीत् ।धर्म शास्त्रवेदान्त सांख्य-योगन्यायादि विषयान्तरेष्वस्य सुमहत् पाटवं-भ्राजते स्म। अनेनैव हेतुना पूर्वमसौ सांख्य विषये अध्यापकत्वेन नियुक्त आसीत् । पूर्वं स्ववृत्तेः प्रारम्भकाले सांख्य-न्यायादि विषयानध्यापयति स्म ।

एतदीय रचनासु नागेशभट्टस्य परिभाषेन्दु शेखरे मूलार्थ-ज्ञापनक्षमा सारगर्भिता सुसरला अतीव वैदुष्य पूर्णा भूतिनाम्नी व्याख्या-अद्यत्वे नितरां समुल्लसति । किंचानेन महाविदुषा शब्देन्दु शेखरस्यापि-व्याख्या अकारि, या अद्य तावन्न प्रकाशयमुपगता मुद्रापिता अभूदिति श्रूयते ।

प्राधम्येनानेन महावैयाकरणेन भर्तृहरिप्रणीतं वाक्यपदीयं सुसम्पाद्य – वाराणसी-संस्कृत-सीरीज इत्यत्र प्रथम-प्रकाशनत्वेन प्रकाशितमासीत् परमिदं – काण्डद्वयात्मकमेव तेन सम्पादितमासीत् तृतीय काण्डोऽस्यवाक्य-पदीय – ग्रन्थस्य परस्तात् श्री गंगाधरशास्त्रिणासम्पादितोऽभूत् । काण्डद्वयात्मको – वाक्यपदीयाख्योहरि-प्रणीतो ग्रन्थः चतुरशीत्युत्तरेऽष्टादशशततमेख्रिष्टाब्देऽस्यैव – महा विदुषः सम्पादकत्वे प्रकाशितो अभूदिति । तृतीयकाण्डात्मको भागस्तु – सप्ताशीत्युत्तरे अष्टादशशततमे ख्रिष्ट हायने शास्त्रि-गंगाधर-द्वारा – सम्पादितः प्रकाशितश्चाभूत् ।

तृतीयकाण्डस्य सम्पादनं केन कारणेनोज्झितमासीदिति न – ज्ञायते । ग्रन्थोऽयं काशी संस्कृत सीरीजेमुद्रितोऽस्ति । तात्या शास्त्रिभिः – विज्ञान-भिक्षुप्रणीत लघु वार्तिकं महामहोपाध्याय केशवशास्त्रि-द्वितीयेन – महता प्रयासेनानेकान् मातृकाग्रन्थानाधारीकृत्य सम्पादितमस्ति । इदं हि – योगसूत्राणां वैयासिकि भाष्यस्य व्याख्यानमस्ति । उभकाविमौ शास्त्रि – तात्या-महानुभाव मराठे केशव-शास्त्रि महोदयौ महताप्रयासेनाने कान् – हस्त लिखितान् ग्रन्थान् संगृह्य सु-सम्पादनं निबद्धतामिति महाविद्यालयस्य – "पण्डित" इति पत्रिकायां प्राकाश्यंचास्यानयतामिति । ग्रन्थोऽयं सांख्याचार्य – परीक्षायां कतिपय वर्षाणि यावत् पाठ्यग्रन्थत्वेन निर्धारितोऽभूदिति । पाठ्यग्रन्थत्वेन यस्य निर्धारणं तत्र भवता प्राचार्यवरेण तदानीन्तनेन थीबो महानुभावेनैव कृतमस्ति ।

पूर्वमसौ महानुभावः श्री नागेशभट्टस्य सुदुरूहस्य परिभाषेन्दु-शेखरस्योपरि सुसरलतया ग्रन्थग्रन्थीरुद्ग्रन्थयन्त्या भूति व्याख्याया विरचनेन विद्वत्समाजे परां ख्यातिं लेभे । यद्यपीयं पूर्वमनुपूर्व्या वाराणसेय-संस्कृत महाविद्यालयस्य मुखपत्रे "पण्डिते" खण्डशः प्राकाश्यमुपगतासीत्, तस्याश्छात्रोपयोगित्वं प्रायः दुष्प्राप्यतां च समीक्ष्य सुलभसंस्करणार्थं स्वीये "राजराजेश्वरी" ख्याख्ये मुद्रणालये अतमर्थच्छात्रहिताय प्रकाशनं मुद्रणं च विहितम् । एभिर्हि दुर्गाघट्टे संस्कृतग्रन्थादि प्राकशनाय स्वीयो मुद्रणयन्त्रालयः प्रतिष्ठापितो अभूत्, यस्मिन्नस्य स्वकार्यातिरिक्तमन्यत् मुद्रणादिकार्यं निष्पद्यते स्म । अस्य शोधितोऽपि शब्देन्दु शेखराख्यो स्वनिर्मितटीका टिप्पणी विभूषितोऽपि प्रकाशितो नास्तीति प्राङ् निर्दिष्टं प्रायमेव ।

अनयोर्द्वयोर्व्याकरणग्रन्थयो व्याख्यानेन तथा स्वाद्भुत वक्तृत्वस्य व्याख्यान शैल्या च तदानीं सुप्रसिद्धोबभूव संस्कृत पण्डित समाजे । एतदतिरिक्तं मरोठेकेशवशास्त्रि सहकारितया सम्पादितस्य योगवार्तिकस्यास्य हेतुनाऽपि महानुभावेनानेन सुमहती ख्यातिरूपा प्रतिष्ठा अलाभि। यद्वीक्ष्य श्री थीबो महोदयो नितरां प्रभावितोऽभूत् । ब्रिटिश-सर्वकारस्य समक्षं महामहोपाध्यायपदव्या एनं सम्मानयितुं पुरस्कर्तुं चानुरूणत् प्रास्तौच्च । फलतो नवाधिके एकोनविंशतिशततमे ख्रिष्टाब्दे ब्रिटिश-सर्वकारात् महामहोपाध्यायेतिविरुदा विभूषितः समलङ्कृतश्च बभूव यदुद्दिश्य श्लोकोऽयमेतत् संसूचयति स्मारयति च-

"सम्राट् प्रदत्तदुरवाप महा महोपा-
ध्यायेति मान्य पदवीं समवाप्य धीमान् ।
विधोतते स्म विदुषां सदसि प्रसिद्धः
तात्यापराख्य पटवर्धन रामकृष्णः ।।

अस्य ज्येष्ठस्तनयः श्रीनारायण शास्त्रीपटवर्धनो व्याकरण - शास्त्रे पितुस्तात्या-शास्त्रिणः समतामावहति स्म । अयं महानुभावोऽपि — सुचिरं वाराणसेयसंस्कृत-महा-विधालये व्याकरणमध्यापयन् तदीय नैपुण्येन — सुमहद्यशो लेभे । एनेन श्रीबालशास्त्रिणो जीवनवृत्त मप्युपनिबद्धम् । —

तात्या शास्त्रिणोगेहे तथा परिवारेऽपिलक्ष्मी-सरस्वत्योः — समान एव निर्द्रोहमनुग्रहश्चकास्ते स्म, अतो अनेन हि दुर्गाघट्टे गंगायास्तटे — प्रोन्नतंतुङ्गं भवनं निर्ममे । यत्तु लोके "पटवर्धन दुर्ग" इति विश्रुतोऽस्ति । इत्थमेव राजराजेश्वरी मुद्रण-यन्त्रालयस्यापि स्वयमेव प्रतिष्ठा दत्ता आसीत्।

अस्य मुद्रण यन्त्रालयस्यायमध्यक्षो बभूव । अस्मिन्नेव मुद्रणालये — अनेनानेके बालोपयोगिनः केचनपाठ्यग्रन्था लिखिताः प्रकाशिताश्च स्वीये राजराजेश्वरी इति मुद्रणालये । अस्यान्यौ द्वौ सूनू शास्त्रि ढुण्ढिराज — शास्त्रि वीरेश्वराभिधो दैवादकाल एव जीवतिपितर्येव स्वर्ययतुः । स्वजीवनस्य — चरमेवयसि पुत्रमृत्यु-जनितेन शोकेनाक्रान्तो भूत्वा कार्श्यमापेदे । तथात्वेऽपि

---

1- काश्याः पण्डितपरम्परा ग्रन्थात् ।

शिबिकामारुह्य महाविद्यालयमध्यापनाय व्रजतिस्म । अन्ते षट् सप्तत्युत्तरे-एकोनविंशतिशततमे वैक्रमेवत्सरे फाल्गुने शुक्ल तृतीयस्यां तिथौ स्वर्ययौ ।

अद्यनाऽपि अस्यानेक शिष्य-प्रशिष्या: भारतवर्षस्य समग्रेषु-प्रान्तेषूपलभ्यन्ते, येषु मुख्या ये तदानीं वाराणसेय-संस्कृत महाविद्यालये-तत्समक्षं व्याकरणमधीयते परिशीलयन्ति स्म वैयाकरणत्वेन, विचित्रपाठन-प्रणाल्या च ।

तात्कालिका व्याकरणविपपाठिषु छात्रा महता कौतुकेनाहमहमिकया-चास्य सन्निधावुपेत्य विनम्रभावेन व्याकरणमभ्यसन्ति स्वकीयं गौरवंच सुमन्यन्त स्म। अस्य प्रशिष्या इदानीं प्राय: सकलायां भारतभुवि समुपलभ्यन्ते ।

विजयाटीकाकर्तुर्जयदेव मिश्रस्य परिचय:

संस्कृत जगति को नाम न श्रीजयदेवमिश्र वैयाकरणत्वेन न —
वेत्ति । अस्य जन्मन: प्रागनन्तरंच विद्वत्समितिषु शास्त्रार्थानां प्रथा प्रत्नभारत-
वद्एकोनविंशत्यधिक-विंशतिशततमे वैक्रमे-संवत्सरे प्रचलन्ती दृष्टिपथमवत-
रति स्म । अयमेव समय: आर्यसमाजस्य प्रादुर्भावोत्थानस्यासीत् । अस्मादेव —
कारणाद् भारतवर्षेयत्र तत्र सनातनधर्मिणामार्यसामाजिकानांच परस्परं —
विधवाविवाहमूर्ति-पूजा वैदिक-विवाहवयोनिरूपणादिविषयेषु तथा पण्डितानां —
जन्मना वर्णव्यवस्था कर्मणा वा तथा स्पृश्यापृश्य-विचार-विषयेषु शास्त्रार्था: —
प्रावर्तन्त । येनायं समयोवाद-युग इति नाम्नाऽपि व्यपदिश्यते स्म ।
अस्मिन्नेव प्रवर्तमाने वाद-युगे एकादशोत्तरैकोनविंशतिशततमे-वैक्रमेऽब्दे —
तथा सप्तचत्वारिंशत्तमेऽधिकेऽष्टादशशततमे क्रिस्टाब्दे जनकपुर्यां मिथिलाया —
"गजहडा" मिधे ग्रामे श्री मिश्र जयदेव पण्डितानां जनि: "सोदरपुर" —
इत्याख्ये विद्वत्कुलेऽजनि । मैथिलानां सम्प्रदायरीत्याचूडाकरणोपनयनादि —
संस्कारेषु निर्वृत्तेषु सत्स्वेव वेदाङ्गानामध्ययनायाधिजिगीषु: कुमारोऽधि-
कृतोभवतीति नियमानुसारेणासौ तदानीं वैयाकरणं पण्डितप्रवरं "हल्लीझा" —
नामानं व्याकरणाधीत्यै गुरुपागच्छदिति । तत्समक्षंच व्याकरणमध्येतुं —
प्रारभत । इत्थमस्मात् प्रारम्भिकान् व्याकरणग्रन्थान् वर्षद्वयंयावत् —
समाप्यार्थिक्या स्थित्या प्रेरित: सन् पुन: स्वाध्यायाय "गन्धवारि"
इति प्रथितं ग्राम मयासीत् । ग्रामेऽस्मिन् महामहोपाध्याय" रज्जो"
मिश्राणामुपान्ते व्याकरणशास्त्रस्य व्याख्याग्रन्थान् शब्देन्दु शेखरादीन् सम्यक्
परिशीलयामास ।

वादयुगे प्रादुर्भूतत्वादस्यापि रुचिः शास्त्रार्थेषुप्रवृत्ताऽभूदिति —
येनायं कादाचित्कतया तत्रापि निर्बाधं प्रावर्तत । अथासौ व्याकरणशास्त्रस्य —
विशिष्टान् ग्रन्थान् परिशीलयितुं वाराणसीमगच्छदिति ।

अत्रासौ देवतावताराद् विद्वच्चक्रचूडामणेः प्रसिद्धाद् वैयाकरणा-
न्महामहोपाध्याय विरुदावली विभूषिताद् तत्र भवतः श्री शिवकुमार—
मिश्र-महाभागाद् व्याकरणादि-शास्त्राणि पपाठ । ततः प्रभृति व्याकरण—
शास्त्रस्य सैद्धान्तिक मौलिक-ग्रन्थाभ्यासजेन यशसा न केवलमसौ परां —
ख्यातिमधिजगाम । किंच प्रगाढपण्डितानां सम्पर्केण सहयोगेन चास्य —
पंचा वा तदानीन्तन काशिक—विद्वत्समाजे संवृत्ता । असावपि काशिक —
पण्डित-समाजे प्रमुखसदस्यतयाऽगण्यत । अस्य सर्वतः समन्तात् प्रसृतेन —
व्याप्तेन च यशसाकृष्टचेता तत्र भवान् दरभंगा नरेशः श्री लो लक्ष्मीधरसिंह-वीर —
तल्लजस्तद्गुणगणमुग्धस्तं काशिकाया दरभंगा पाठशालायाः प्रधानाध्यापक —
पदे महता गौरवेण सार्धं निदेशयामास प्राचार्य-पदासीनमकरोत् ।
विद्यालयेऽस्मिन्नस्य सहयोगिन आचार्य श्री तात्या रामकृष्णमित्यादयः —
श्री-शिवकुमारमिश्रपादाः श्री सुधाकर-द्विवेदि प्रभृतयः प्रमुखाः सकलशास्त्र-
निष्णाताः पण्डितपुंगवा आसन् हेयुते महामहोपाध्यायभाज अस्य सहयोगिन —
आसन् ।

श्री महामना मदन मोहन मालवीयाग्रहेणैभिः किल हिन्दु-विश्व-
विद्यालयस्य प्राच्य विद्याविभागेऽध्यक्षतोररीकृता । अथ समस्तेभारतेऽसौ —

सुविश्रुतो बभूवपण्डितमूर्धन्यत्वेन । येनास्य कीर्तिस्तत्र तदानीन्तनस्य-भारतसम्राज: प्रतिनिधिभूतस्य "वाइसराय" स्य कर्णान्तिकंप्राप, भारत-सर्वकार-प्रतिनिधिनाऽसावेकोनविंशत्युत्तरैकोनविंशति-शततमे महामहोपाध्याय-पदव्याऽलङ्कृत: परां प्रतिष्ठिमाप ।

अस्य व्याकरणादि-शास्त्र वैदुष्यात्प्रभावितेन डा0 गंङ्गानाथ-झा महोदयेन जयदेव-मिश्रमधिकृत्येत्थमभाणि, यद् जयदेवोऽभिजनाभ्यास-शास्त्रार्थैश्वर्यादि भुक्ति-मुक्ति विषयेष्वभिष्टुतोऽस्ति सर्वोत्कृष्टत्वेन ।

तथा हि -

"जय: कुले जयोऽभ्यासे जय: पण्डित मण्डले ।
जयो भूत्यै जयो मोक्षे जयदेवे सदा जय: ।।"

इति तस्य पाण्डित्यं प्रखरमप्रतिहत-गतिशीलं सर्वत्र भारते रराजते स्म ।

श्री-जयदेव मिश्रो भारतीयतायास्तथास्या: पुण्यभूमे: सभ्यताया: संस्कृतेश्च मूर्तां प्रतिकृतिरभूत्, विधाप्रियतयातथोद्भटपाण्डित्येन सार्धमेवाऽसौ धार्मिक विधिविधानेषु कर्मसु कृत्येष्वपि प्रगाढां रूचिमाधत्ते स्म ।

महामना मदन मोहन मालवीयेनैका "अस्पृश्यता-निवारणविषये-पण्डितानामेका गोष्ठी समायोजिता । यत्रास्पृश्यता-निवारणपक्षे पण्डिता:-सामयिकीं परिस्थितिमभिवीक्ष्यास्पृश्यता निवारणपक्षं तथाकथितशास्त्रीय-प्रमाणोपन्यासपुरस्सरं समर्थयामासु: । यद् दृष्ट्वाऽसौ शास्त्रविधिमेतद्-विषये-तैरेव शास्त्रप्रमाणैरस्मिन्निदिर्दष्टैर्ग्रन्थैरेव तन्मतं खण्डयामास । नासौ तत्कालोचितस्य विश्वविद्यालयीय वातावरणस्य प्रभावेण संस्पृष्ट: संलिप्तश्चा-भवत् ।

---

1. काश्या: पाण्डित्य परम्परा ग्रन्थात्

महामनसां मालवीय महोदयानामाध्यक्ष्ये मध्यस्थत्वे च शास्त्रार्थस्य — याथार्थ्येनान्वर्थत्वेन च स्थेयो मालवीयमहोदयो नितरां प्रासीददन्तरङ्गे चास्य — निर्भीकतां यथार्थवस्तुप्रतिपादनशैलीं नूनं प्रशशंस । देशकालादिसमयाचारानुकूल्येन — व्यवहारप्रवर्तनम्मतं पृणाति स्म । स्वतो न च तदीयानि प्रमाणानि युक्तींश्च — खण्डयितुमुदसहत मालवीय महाभागः । शास्त्रविधिपरिहारंच नान्वमोदत । सनातनधर्मोद्धार-सम्बन्धिनः शास्त्रार्थास्तत्प्रणीतायां शास्त्रार्थ-रत्नावलौ — याथातथ्येनाद्याप्युपलभ्यन्ते । महानुभावोऽसौ धार्मिको निष्ठावान् — सदाचारपरायणः प्रत्यहं ब्राह्ममुहूर्ते उत्थाय शौचाद्याह्निकं-कर्मसमाप्याहरहो — मणिकर्णिकातीर्थे नित्य-सवनाय जगाम । ततः प्रतिनिवृत्य विश्वनाथस्य — दर्शनमपिचकार । जंजपूकोऽसौ गायत्रीसहस्रमालामपि जजाप । नायं — स्वोदरम्भरिः स्वार्थसेवी पण्डितः, परं यथा-शक्तिपरानुपक्रियाहर्निपि समये — समये उपकुरुते स्म । तदीय परोपकृति निदर्शनभूता तदीये 'गजहडा' ग्रामे तद् — क्लृप्ता उत्खाता च पुष्करिणी, अद्यापि समुल्लसति ।

एतदतिरिच्य कर्मकाण्ड-विषयेऽस्य विशिष्टागति-रासीदेतन्निर्मिता — नैकविधा ग्रन्थाः सन्ति । महानिबन्धेऽस्मिन् परिभाषेन्दु-शेखरस्य विजया — व्याख्याकारत्वादस्य समुचितं योगदानं स्थानं वरीवर्ति व्याकरणजगति ।

अस्यान्या कृतयो निम्ननिर्दिष्टा उपलभ्यन्ते -

(1) परिभाषेन्दु-शेखरस्य विजया टीका (व्याकरणे)

(2) शास्त्रार्थरत्नावली (सामान्यम्)

§3§ व्युत्पत्तिवादस्य-टीका §व्याकरणे§

§4§ महा-विनायक-स्थापनपद्धति: §कर्मकाण्डे§

§5§ वास्तु-पद्धति: §कर्मकाण्डे§

§6§ शतचण्डी पद्धति: §कर्मकाण्डे§

§7§ कुलदेवता स्थापन-पद्धति: §कर्मकाण्डे§

§8§ नीलवृषोत्सर्ग पद्धति: "

§9§ तुलादान पद्धति: "

एतदतिरिक्तं विविधविषयेषु सम्पादिता निबन्धाश्च सन्ति ।

अथास्येमे प्रमुखा: सुशिष्या आसन्निति

§1§ महामहोपाध्याय सर डा0 गंगानाथ झा महोदया: —
प्रयाग विश्वविद्यालयस्य भूतपूर्वा: कुलपतय: ।

§2§ पण्डितराजनारायण शास्त्रिण: —
काशी हिन्दु-विश्वविद्यालयस्य भूतपूर्वा: व्याकरण-शास्त्राध्यापक-प्रवरा: ।

§3§ पण्डित मार्कण्डेय-मिश्रपादा: भूतपूर्व प्राचार्यमहाराजा-संस्कृत कालेज जयपुरस्य ।

§4§ श्रीदामोदर-मिश्रा: विविधविषयविद्वांस: ।

एवंच पं0 मधुसूदन-मिश्रस्य सूनवस्तत्रभवन्तो महामहोपाध्याय-पं0 उमेशमिश्रपादा:, अमुष्य प्रशस्यत्वेन शिष्यत्वेन वाद्यापि एनमविस्मरणीयं —

कुर्वन्तो विराजन्ते । किं बहुना "विद्वच्चरित पंचकस्य" रचयिता पण्डित-नारायण शास्त्रिखिस्ते महोदय पं० शिव कुमार-मिश्र-पादानां-संस्मरणे-प्रशस्तौ च रामदेव-मिश्र-पादा निम्नांकिते श्लोके महता आदरेणेत्थं-संस्मृताः सन्ति -

नानाग्रन्थ विधानतोन यशसा व्याप्ताखिलं भारत
मध्यापि प्रचुरं व्यधायि बहुलान् विद्यार्थिनः पण्डितान् ।।
विद्वत्संसदि गीष्पति प्रतिमतां सम्पाद्य लोकोत्तरां ।
सायुज्यं यमदेवमिश्र-विबुधा विश्वेश्वरेणाप्नुवन् ।।

------------------

1- साभार: पण्डितपरम्परा-ग्रन्थात् आचार्य बलदेवोपाध्यायस्य
प्रकाशक का.हि.वि.वि. प्रथम संस्करण 1983.